जनवरी, फरवरी २०१७ ईसवीयाब्दः ओ३म् R.N.I.Regd. No. UPBIL/1998/1485

ज्वालापुरीय - गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

'भारते भातु भारती'

## अन्यायसहनं पापम्

-डा. रामकिशोरमिश्रः
पूर्वोपाचार्यः संस्कृतविभागाध्यक्षश्च
महामना-मालवीय-महाविद्यालयः, खेकड़ा
बागपत-२५०१०१ (उत्तरप्रदेशः)

(१)

ऋषिमहोत्कटो देशे कश्यपस्य पुत्रोऽभवत् ।
विवाहं राजपुत्रस्य कारयितुं काशीं गतः ॥

(२)

मार्गे राक्षसधूमाक्षं शस्त्रयुक्तं स दृष्टवान् ।
यस्य हि काश्यामातङ्कः सर्वत्र प्रसृतोऽभवत् ॥

(३)

पितुरुपदेशस्तस्य सुस्मृतिपथमागतः ।
धर्मस्य विरुद्धा पीडा सहनीया कदापि न ॥

(४)

ऋषिमार्गे धूमाक्षेनाऽवरोध उपस्थापितः ।
भस्मो भवेति शापेन तद्वध ऋषिणा कृतः ॥

(५)

जघनो धूमाक्षपुत्रः श्रुत्वा निजपितुर्वधम् ।
काशीनरेशप्रासादे गत्वा स ऋषिमाक्रमत् ॥

(६)

तेजसोत्पन्नः ज्वालाभिः स ऋषिणा भस्मीकृतः ।
राक्षसो हत इति मत्वर्षिस्तुती राज्ञा कृता ॥

(७)

राक्षससंहारं कृत्वा भवता धर्मो रक्षितः ।
नमस्तुभ्यं नमस्तुभ्यमृषे! तुभ्यं नमो नमः ॥

(८)

रामकिशोरमिश्रेण शूकरक्षेत्रवासिना ।
अन्यायसहनं पापं जनबोधाय वर्णितम् ॥

दूरभाषः - ९२१९४०६०७८ / ९२१९४०६०७४ (ज्वालापुरम्) तारगृहम् - महाविद्यालयः(ज्वालापुरम्)


# भारतोदयः

**संस्कृत - मासिकपत्रम्**

वर्षम्- १०७ अङ्कौ- ७, ८

*सम्पादकः*

**डॉ. हरिगोपालशास्त्री**

*व्याकरणाचार्यः*

*एम.ए.,पी- एच.डी.*

**राष्ट्रपति-पुरस्कृतः**

*सह - सम्पादकः*

**डा.केशवप्रसाद उपाध्यायः**

*साहित्याचार्यः*

*एम.ए.,पी- एच.डी.*

*प्रबन्ध - सम्पादकः*

**डॉ. अजयकौशिकः**

*साहित्याचार्यः*

*एम.ए.,पी- एच.डी.*

*प्रकाशकः*

गुरुकुलमहाविद्यालयः ज्वालापुरम्

हरिद्वारम्-२४९४०४

*(उत्तराखण्ड-प्रदेशः)*

**शुल्क - विवरणम्**

| | | |
|---|---|---|
| प्रत्यङ्कम् | - | ५/- |
| वार्षिकम् | - | ५०/- |
| आजीवनम् | - | ५००/- |


# विषयानुक्रमणिका


| | | |
|---|---|---|
| १. श्रुति-सुधा | -महर्षिदयानन्दसरस्वती | ०३ |
| २. वाल्मीकि-रामायणे वेदादेशानां परिपालनम्(३) | -प्रो. वेदप्रकाशशास्त्री | ०४ |
| ३. आयुर्वेदे वनस्पतिविज्ञानम् | -डॉ. हरिगोपालशास्त्री | ०८ |
| ४. कुलभूमि-गौरवम्(२) | -प्रो. सत्यदेवनिगमालङ्कारः | १० |
| ५. ऋतु-वर्णनम् | -प्रो. रामदत्तशर्मा | १२ |
| ६. प्रियायाः सान्निध्यम्(१) | -डॉ. प्रशस्यमित्रशास्त्री | १३ |
| ७. स्वामी दर्शनानन्दः सरस्वती | -डॉ. निगमशर्मा | १६ |
| ८. भारतोदय-प्रकाशन-विवरणम् | -डॉ. हरिगोपालशास्त्री | १८ |



**राष्ट्रियसंस्कृतसंस्थानस्य अनुदानसाहाय्येन प्रकाशितम्**

**भारतोदयः(संस्कृत-मासिकम्)**

**(RNI Regd. No. UPBIL/1998/1485)**

| | |
|---|---|
| १. प्रकाशनस्थानम् | ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डम्) |
| २. प्रकाशनकालावधिः | मासिकम् |
| ३. सङ्केतेन सह मुद्रकस्य प्रकाशकस्य, सम्पादकस्य नाम, नागरिकता च | डा. हरिगोपालशास्त्री, भारतीयः गुरुकुलमहाविद्यालयः ज्वालापुरम् पत्रालयः- गुरुकुल काङ्गड़ी, हरिद्वारम्-२४९४०४ (उत्तराखण्डम्) |
| ४. पत्राधिकारिणां नाम्ना सह सङ्केतः | ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभा, ज्वालापुरम्, पत्रालयः - गुरुकुल काङ्गड़ी हरिद्वारम्-२४९४०४ (उत्तराखण्डम्) |

डा. हरिगोपालशास्त्री इति नामाहं समुद्घोषयामि यदुपरि लिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

-डॉ. हरिगोपालशास्त्री

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

भविक-भरित-भारतोदयोऽयं भव-विभवोद्भव-भावनाभिलाषी ।
भगवति भुवि भक्ति-भाव-भाजां भव-भय-भाव-भरं भ्रियान्नभूमन् ॥

× × ×

निशम्यतां लेख-ललाम-सञ्चय-प्रकाशने येन कृतोऽतिनिश्चयः ।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः' ॥

| वर्षम्- १०७ | माघः, फाल्गुनः २०७३ विक्रमाब्दः ❁ जनवरी, फरवरी २०१७ ईसवीयाब्दः | अङ्कौ-७, ८ |
|---|---|---|

## ❁ श्रुति-सुधा ❁

ओ३म् ह्रदं न हि त्वा न्यृषन्त्यूर्मयो ब्रह्माणीन्द्र तव यानि वर्धना ।
त्वष्टा चित्ते युज्यं वावृधे शवस्ततक्ष वज्रमभिभूत्योजसम् ॥

-ऋग्वेदः १/१०/५२/७

**पदार्थः -**

(**ह्रदम्**) जलाशयम् (**न**) इव (**हि**) खलु (**त्वा**) त्वाम् (**न्यृषन्ति**) नितराम् प्राप्नुवन्ति (**ऊर्मयः**) तरङ्गा(इवोत्साहा)दयः (**ब्रह्माणि**) बृहत्तमान्यन्नानि (**इन्द्र**) विद्युद्वद् वर्त्तमान (**तव**) (**यानि**) वक्ष्यमाणानि (**वर्धना**) सुखानां वर्धनानि (**त्वष्टा**) मेघाऽवयवानां मूर्त्तद्रव्याणां च छेत्ता (**चित्**) अपि (**ते**) तव (**युज्यम्**) योक्तुमर्हम् (**वावृधे**) वर्धते (**शवः**) बलम् (**ततक्ष**) तक्षति (**वज्रम्**) प्रकाशसमूहम् (**अभिभूत्योजसम्**) अभिगतानि भूतयः तप ऐश्वर्याण्योजः पराक्रमश्च यस्मात्, तम्॥७॥

**भावार्थः -**

यथा जलं निम्नं स्थानं गत्वा स्थिरं स्वच्छं भवति, तथा (राजपुरुषाः) सद्गुणविनयवन्तं पुरुषं प्राप्य स्थिराः शुद्धिकारका भवन्तीति॥७॥

-महर्षिदयानन्दसरस्वती

[ऋग्वेदभाष्यम्, तृतीयो भागः, २९ पृष्ठे ]

# वाल्मीकि-रामायणे वेदादेशानां परिपालनम् (३)

प्रो. वेदप्रकाशशास्त्री
आचार्योपकुलपतिचरः
गुरुकुल-काङ्गड़ी-विश्वविद्यालयः,
हरिद्वारम् (उत्तराखण्डम्)

वाल्मीकि-रामायणे वैदिक-परम्परया रामादीनां चतुर्णामपि राजपुत्राणां पाणिग्रहण-संस्कारः सम्पन्नः। यथा-

**अग्निमाधाय तं वेद्यां विधिमन्त्रपुरस्कृतम्।**
**जुहावाग्नौ महातेजा वसिष्ठो मुनिपुङ्गवः ॥**
**ततः सीतां समानीय सर्वाभरणभूषिताम् ।**
**समक्षमग्नेः संस्थाप्य राघवाभिमुखे तदा ॥**
**अब्रवीज्जनको राजा कौसल्यानन्दवर्धनम् ।**
**इयं सीता मम सुता सहधर्मचरी तव ॥**
**प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ।**
**पतिव्रता महाभागा छायेवानुगता सदा[७९] ॥**

**ब्रह्मविद्यया स्वेच्छया देहत्यागः-**

ब्रह्मविदस्तपस्विन आत्मसाधनामभिवर्ध्य स्वेच्छया शरीरं परित्यज्य स्वर्गमुपयान्ति। यथा वेदमन्त्रोऽयममुं भावं प्रकटयति-

**त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।**
**उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्[८०] ॥**

वाल्मीकि-रामायणे शरभङ्गो महाप्राज्ञो रामस्य पश्यत एव शरीरं तत्याज। रामेण सह या वार्ता तेन तपस्विना कृता, सा मधुवती वाक् तस्याक्षय्यं तप एव कथयति। यदाग्निहोत्रमुपासीनं शरभङ्गं तपस्विनं रामः पश्यति, तदा आश्रमपदमुपागतं राममालोक्य स कथयति-

**अहं ज्ञात्वा नरव्याघ्र वर्तमानमदूरतः ।**
**ब्रह्मलोकं न गच्छामि त्वामदृष्ट्वा प्रियातिथिम् ॥**
**त्वयाहं पुरुषव्याघ्र धार्मिकेण महात्मना ।**
**समागम्य गमिष्यामि त्रिदिवं चावरं परम् ॥**
**अक्षया नरशार्दूल जिता लोका मया शुभाः ।**
**ब्राह्मयाश्च नाकपृष्ठयाश्च प्रतिगृह्णीष्व मामकान्[८१] ॥**
... ... ... ... ...
**एष पन्था नरव्याघ्र मुहूर्तं पश्य तात माम्।**
**यावज्जुहोमि गात्राणि जीर्णां त्वचमिवोरगः ॥**

---

७९. वाल्मीकिरामायणम् बालकाण्डम् ७३.२४-२७

८०. यजुर्वेदः ३.६०

८१. वाल्मीकिरामायणम् अरण्यकाण्डम् ५.२९-३१

ततोऽग्निं स समाधाय हुत्वा चाज्येन मन्त्रवत्।
शरभङ्गो महातेजा प्रविवेश हुताशनम्[८२]॥

## वेदानुगाः पारिवारिकादर्शाः-

वेदेषु परिवारमुद्दिश्य परिवारं निर्व्यवधानं कर्तुं ये संदेशा लभन्ते, ते सार्वत्रिकाः सार्वभौमाः नियतसुखकराश्च। सर्वेषां पारिवारिकजनानामन्योऽन्यं सौमनस्यमहर्निशमभिवर्धतां द्वेषभावस्याङ्कुरमपि नोद्भवेत्। यथा-

सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।
अन्योऽअन्यमभि हर्यत वत्सं जातमिवाघ्न्या[८३]॥

... ... ... ... ...

अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः।
जाया पत्ये मधुमतीं वाचं वदतु शान्ति वाम्[८४]॥

... ... ... ... ...

मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया[८५]॥

वाल्मीकि-रामायणे पुत्राणां मनसि कदापि नासीद् दुर्गुणोऽयं यत्ते पितुरवज्ञां कुर्युः। भगवता रामेण पितुरादेशः प्राणपणेनापि सदैव पालितः। पितुर्भावं हृदि निधाय कैकयीं वदति रामः। यथा-

तद् ब्रूहि वचनं देवि राज्ञो यदभिकांक्षितम्।
करिष्ये प्रति जाने च रामो द्विर्नाभिभाषते[८६]॥

यदा वनगमनान्निवारयितुं रामं जना कामयन्ते, तदा यदपि प्रार्थनामयं पद्यं तैर्निगदितं तदपि हृदि निहितं गुणमौक्तिमिव भासते। तेषां नगरवासिनां भावनां विज्ञाय पितुरादेशमक्षरशून्यमनुपालयन् तान् सर्वान् ब्रूते सानुनयम्। भरतो रामं ब्रूते-

ज्ञातयश्चापि योधाश्च मित्राणि सुहृदश्च नः।
त्वामेव हि प्रतीक्षन्ते पर्जन्यमिव कर्षकाः[८७]॥

रामः भरतं प्रत्युत्तरयन्-

लक्ष्मीश्चन्द्रादपेयाद्वा हिमवान् वा हिमं त्यजेत्।
अतीयात् सागरो वेलां न तु प्रतिज्ञामहं पितुः[८८]॥

पितुराज्ञा अविचारणीयेति मनसि निधाय राम उवाच-

अहं हि वचनाद् राज्ञः पतेयमपि पावके।
भक्षयेयं विषं तीक्ष्णं पतेयमपि चार्णवे[८९]॥

... ... ... ... ...

स रामः पितरं कृत्वा कैकयीं च प्रदक्षिणम्।
निष्क्रम्यान्तःपुरात् तस्मात् स्वं ददर्श सुहृज्जनम्[९०]॥

---

८२. वाल्मीकिरामायणम् अरण्यकाण्डम् ५.३८-३९
८३. अथर्ववेदः ३.३०.१
८४. अथर्ववेदः ३.३०.२
८५. अथर्ववेदः ३.३०.३
८६. वाल्मीकिरामायणम् अयोध्याकाण्डम् १८.३०
८७. वाल्मीकिरामायणम् अयोध्याकाण्डम् ११२.१२
८८. वाल्मीकिरामायणम् अयोध्याकाण्डम् ११२.१८
८९. वाल्मीकिरामायणम् अयोध्याकाण्डम् १८.२८
९०. वाल्मीकिरामायणम् अयोध्याकाण्डम् १९.२९

रामस्य स्वमातरि कियानासीत् समभावस्तत्र द्वे पद्ये प्रवाच्ये-

**कौसल्यायां यथा युक्तो जनन्यां वर्तते सदा।**
**तथैव वर्ततेऽस्मासु जन्मप्रभृति राघवः**[११] ॥

वेदे पारिवारिकादर्शविषये सन्त्यनेके मन्त्राः, ये पारिवारिकजनजीवनलतां कर्त्तव्योपदेशजलसेकेन संवर्धयन्ति। पत्नी पतिं पतिः पत्नीं मधुरया कष्टहारिण्या समुल्लासप्रदया प्रहर्षिण्या सोमकल्पया च वाचा प्रमोदयेत्। पत्नी पतिमनुसरन्ती सुखानुभूतिं प्रकटयेत् सौमनस्यभावं विवर्धयेत्। यथा-

**आशासाना सौमनसं प्रजां सौभाग्यं रयिम् ।**
**पत्युरनुव्रता भूत्वा सं नह्यस्वामृताय कम्**[१२] ॥

वनागमनकाले सीतया रामेण सह वनगमने द्रढीयसी निजेच्छा प्रकटिता। रामेण वनवासोद्भूतानि यानि यानि दुःखानि भवन्ति, तानि सर्वाणि निगदितानि परं दृढसङ्कल्पया सीतया यदुक्तं तदद्भुतमेव। यथा-

**भर्तुभाग्यं तु नार्येका प्राप्नोति पुरुषर्षभ ।**
**अतश्चैवाहमादिष्टा वने वस्तव्यमित्यपि**[१३] ॥

... ... ... ... ...

**ईर्ष्यां रोषं बहिष्कृत्य भुक्तशेषमिवोदकम् ।**
**नय मां वीर विस्रब्धः पापं मयि न विद्यते**[१४] ॥

... ... ... ... ...

**अहं दुर्गं गमिष्यामि वनं पुरुषवर्जितम् ।**
**नाना मृगगणाकीर्णं शार्दूलगणसेवितम्**[१५] ॥

... ... ... ... ...

**सुखं वने निवत्स्यामि यथैव भवने पितुः।**
**अचिन्तयन्ती त्रींल्लोकांश्चिन्तयन्ती पतिव्रतम्**[१६] ॥

... ... ... ... ...

**शुश्रूषमाणा ते नित्यं नियता ब्रह्मचारिणी।**
**सह रंस्ये त्वया वीर वनेषु मधुगन्धिषु**[१७] ॥

... ... ... ... ...

**फलमूलाशना नित्यं भविष्यामि न संशयः।**
**न ते दुःखं करिष्यामि निवसन्ती त्वया सदा**[१८] ॥

वाल्मीकि-रामायणे सर्वत्र समेषां जनानां जीवनं वेदालोकेनालोकितं विद्यते। रामराज्ये सर्वे जनाः ससुखा आसन्, परं प्रसन्नाः सन्तो जीवनं धारयन्ति स्म। सर्वे जना नित्यानन्दयुक्ता धर्मपरायणा निर्भया निरन्तारायाा हिंसाभावैरस्पृष्टहृदयाः पूर्णपुरुषायुषधारिणः पुत्रपौत्रवन्तः, शोक-सन्ताप-

---

११. वाल्मीकिरामायणम् अयोध्याकाण्डम् २०.३
१२. अथर्ववेदः १४.१.४२
१३. वाल्मीकिरामायणम् अयोध्याकाण्डम् २८.५
१४. वाल्मीकिरामायणम् अयोध्याकाण्डम् २८.८
१५. वाल्मीकिरामायणम् अयोध्याकाण्डम् २८.११
१६. वाल्मीकिरामायणम् अयोध्याकाण्डम् २८.१२
१७. वाल्मीकिरामायणम् अयोध्याकाण्डम् २८.१३
१८. वाल्मीकिरामायणम् अयोध्याकाण्डम् २८.१६

वह्निना अदग्धाः, स्वस्वकर्मरतास्तुष्टाः पुष्टा अनामया अनृतविचाररहिता वेदाध्ययनरताश्चासन्।

यथा-

**सर्वं मुदितमेवासीत् सर्वे धर्मपरोऽभवत् ।**
**रामेवानुपश्यन्तो नाभ्यहिंसन् परस्परम्**[९९] ॥

... ... ... ... ...

**आसन् वर्षसहस्राणि तथा पुत्रसहस्रिणः ।**
**निरामया विशोकाश्च रामे राज्यं प्रशासति**[१००] ॥

... ... ... ... ...

**नित्यमूला नित्यफलास्तरवस्तत्र पुष्पिताः ।**
**काले वर्षति पर्जन्यः सुखस्पर्शाश्च मारुतः**[१०१] ॥

... ... ... ... ...

**ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा लोभविवर्जिताः ।**
**स्वकर्मसु प्रवर्तन्ते तुष्टाः स्वैरेव कर्मभिः**[१०२] ॥

... ... ... ... ...

**आसन् प्रजा धर्मरता रामे शासति नानृताः ।**
**सर्वे लक्षणसम्पन्नाः सर्वे धर्मपरायणाः**[१०३] ॥

... ... ... ... ...

**न पर्यदेवन् विधवा न च व्यालकृतं भयम् ।**
**न व्याधिजं भयं चासीद् रामे राज्यं प्रशासति**[१०४] ॥

**निर्दस्युरभवल्लोको नानर्थं कश्चिदस्पृशत् ।**
**न च स्म वृद्धा बालानां प्रेतकार्याणि कुर्वते**[१०५] ॥

आर्षविद्याध्ययने ये जना रुचिं तन्वन्ति, तेषामभ्युदयो भवति विष्वक् योगक्षेमावहः। चतुर्दशविद्या आर्षपद्धत्या मानवानुन्नेतुं क्षमन्ते। साहित्यम् आनन्दमयं प्रकुरुते। वाल्मीकिरामायणं काव्यमार्षं विद्यते, तदध्ययनं तथा अध्यापनं च जीवनोन्नयनाय यद् यदपेक्षितं तत्तत् प्रयच्छति। अत एव फलश्रुतिप्रसङ्गे प्राकृतजनोल्लासाय वैदिकपरम्परा-विकासाय च लौकिकच्छन्दसः प्रथमावतारवाचकस्य वाल्मीकिरामायणस्य आर्षस्यादिकाव्यस्य महत्त्वं प्रगीयते भगवता वाल्मीकिना -

**धर्म्यं यशस्यमायुष्यं राज्ञां च विजयावहम् ।**
**आदिकाव्यमिदं चार्षं पुरा वाल्मीकिना कृतम्**[१०६] ॥

**शृण्वन्ति य इदं काव्यं पुरा वाल्मीकिना कृतम् ।**
**ते प्रार्थितान् वरान् सर्वान् प्राप्नुवन्तीह राघवात्**[१०७] ॥

**रामायणमिदं कृत्स्नं शृण्वतः पठतः सदा ।**
**प्रीयते सततं रामः, स हि विष्णुः सनातनः**[१०८] ॥

**एवमेतत् पुरावृत्तमाख्यानं भद्रमस्तु वः ।**
**प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम्**[१०९] ॥

---

९९. वाल्मीकिरामायणम् युद्धकाण्डम् १२८.१००
१००. वाल्मीकिरामायणम् युद्धकाण्डम् १२८.१०१
१०१. वाल्मीकिरामायणम् युद्धकाण्डम् १२८.१०३
१०२. वाल्मीकिरामायणम् युद्धकाण्डम् १२८.१०४
१०३. वाल्मीकिरामायणम् युद्धकाण्डम् १२८.१०५
१०४. वाल्मीकिरामायणम् युद्धकाण्डम् १२८.९८
१०५. वाल्मीकिरामायणम् युद्धकाण्डम् १२८.९९
१०६. वाल्मीकिरामायणम् युद्धकाण्डम् १२८.१०७
१०७. वाल्मीकिरामायणम् युद्धकाण्डम् १२८.११४
१०८. वाल्मीकिरामायणम् युद्धकाण्डम् १२८.११९
१०९. वाल्मीकिरामायणम् युद्धकाण्डम् १२८.१२१

कुटुम्बवृद्धिं धनधान्यवृद्धिं
स्त्रियश्च मुख्याः सुखमुत्तमं च ।
श्रुत्वा शुभं काव्यमिदं महार्थं
प्राप्नोति सर्वां भुवि चार्थसिद्धिम्[११०]॥

आयुष्यमारोग्यकरं यशस्यं
सौभ्रातृकं बुद्धिकरं शुभं च ।
श्रोतव्यमेतन्नियमेन सद्भि-
राख्यानमोजस्करमृद्धिकामैः[१११]॥

वेदविद्या-पारङ्गतानां विद्या-विशारदानां शारदा-तनयानां स्वाध्यायतपश्चर्यारतानां वैदिकादर्शैरात्मानं पवित्रयितुमुद्यतानां प्राकृताप्राकृत-जनानां मतमिदं विद्यते यद्यदि कस्यचित् मातरि, पितरि, भ्रातरि, सतीर्थे, मित्रे, भगिन्यां, भ्रातृजायां, तपस्विनि, नेतरि, राजनि, पार्श्ववर्तिनि, स्वामिनि, सेवके, गुरौ, योद्धरि, प्रवाचके, पुरोहिते, न्यायकर्त्तरि, दण्डप्रदातरि च प्रकाशमानां वैदिक-परम्परां द्रष्टुं बलवतीच्छा वर्तते, तर्हि नूनमेव तेन वाल्मीकि-रामायणमध्येतव्यं श्रोतव्यं च। वाक्यमिदं सत्यं विद्यते-

यावत् स्थास्यन्ति गिरयः सरितश्च महीतले।
तावद् रामायण-कथा लोकेषु प्रचरिष्यति[११२]॥
राम रामो राम इति प्रजानामभवत् कथाः ।
रामभूतं जगदभूद् रामे राज्यं प्रशासति[११३] ॥

●

११०. वाल्मीकिरामायणम् युद्धकाण्डम् १२८.१२४
१११. वाल्मीकिरामायणम् युद्धकाण्डम् १२८.१२५
११२. वाल्मीकिरामायणम् बालकाण्डम् २.३६
११३. वाल्मीकिरामायणम् युद्धकाण्डम् १२८.१०२

# आयुर्वेदे वनस्पतिविज्ञानम्

-डॉ. हरिगोपालशास्त्री
कुलपतिः- गुरुकुल-महाविद्यालय-ज्वालापुरीयः
हरिद्वारम् ( उत्तराखण्डम् )

एतद् वार्ताविषयो वर्तते 'आयुर्वेदे वनस्पतिविज्ञानम्' अस्य विषयस्य विवेच्यवस्तुः वर्तते यद् आयुर्वेदेति ज्ञानशाखायां वनस्पतीनां किं महत्त्वम् इति। तत्रोच्यते चरकसंहितानुसारं हेतु-लिङ्क-औषधिज्ञानात्मकविद्यैव आयुर्वेदेति प्रचक्ष्यते। आयुर्वेदस्य एतत् त्रिके औषधिरेव मुख्यतया विराजते। सैव औषधिः वनस्पतीति नाम्ना सम्प्रति व्यवह्रियते, अतः आयुर्वेदे तु मुख्यतया वनस्पतीनामेव परिचयः, गवेषणम्, अनुसन्धानं, परीक्षणं, प्रयोगश्च क्रियते। अत एव आयुर्वेदविद्यार्थिस्तु वनस्पतिविज्ञानस्यैव विद्यार्थीति मन्यते।

प्रथमं 'वनस्पतिः' इति शब्दस्य अर्थबोधः स्यात्। अमरकोषस्य द्वितीये काण्डे 'वनौषधिवर्गः' इति प्रकल्पितः। तत्र 'वानस्पत्यः फलैः पुष्पात्, तैरपुष्पात् वनस्पतिः' इति अर्थनिर्धारणानुसारं 'पुष्पं विना जातैः फलैः उपलक्षितः वृक्ष एव वनस्पतिरित्युच्यते। आंग्लभाषया- The tree that bears fruit without any blossom इति वक्तव्यम्। सत्यप्येतन्निर्धारणे सम्प्रति वनस्पतिनाम्ना

सर्वमेव तृणलता वीरुध् वृक्षादयोऽवगम्यन्ते। आङ्ग्लभाषायां Flora इति तदुच्यमानं भवति। वनौषधिवर्गत्वेन कोषकारेण श्री-अमरसिंहेन यदरच्यत् तद् अष्टात्रिंशदुत्तरशतत्रयं श्लोकानां विशालो राशि वर्तते। एतत् साधयति यत् वनं नाम तु औषधिप्रायमेव अस्ति। एतद् विशालवर्णनम् औषधीनाम् अन्वेषणस्य, परिचयस्य, विश्लेषणस्य, परीक्षणस्य प्रयोगस्य च आयुर्वैदिकानामौत्सुक्यं सङ्केतयति। अत्र तृण-लता-वीरुधवृक्षादीनां मूलस्य, प्रकाण्डस्य शाखानां त्वचां पत्राणां मञ्जा-पुष्प-फल-बीजादीनां व्यक्तिशः वैशिष्ट्यन्तु व्याख्यातमेव सहैव गुणादीनामपि व्याख्यानमुपवर्णितं विद्यते। एतत्सर्वं निस्सन्दिग्धतया साधयति यत् आयुर्वेद-विद्याविभागे वनस्पति-विज्ञानं प्रचुरतया उपलभ्यते।

अथ च यद् आयुर्वेदविद्भिः सिद्धान्तितम् 'उत्तमो रसवैद्यस्तु मध्यमो मूलकादिभिः, अधमः शस्त्रदाहाभ्यां चिकित्सा त्रिविधा मता' एतदपि आयुर्वेदे वनस्पति-विज्ञानस्य महत्त्वं प्रतिपादयति। यथा हि रसवैद्यस्य कृतेऽपि मूलकादिविधि-प्रयोजकवैद्यस्य कृतेऽपि वनस्पतीनां विशिष्टं ज्ञानन्तु अपेक्ष्यत एव। एतावता वनस्पतिविज्ञानन्तु आयुर्वेदस्य मुख्यो विषयः।

प्रसङ्गेऽस्मिन् त्रयोदशख्राष्टाब्दस्य आचार्ययशोधरभट्टकृतस्य 'रससुधाकरः' इति नाम आयुर्वेदग्रन्थस्य नामोल्लेखः समीचीनः। अस्य ग्रन्थस्य नवमेऽध्याये दिव्यौषधीनां, रसौषधीनां, महौषधीनां, सिद्धौषधीनां, वर्णनावसरे षड्षष्टि-उत्तर-द्विशतानां सोमवल्ली-माधवीप्रभृतीनां वन्यौषधीनां समुल्लेखः भृशं मोदयति विदुषां मनांसि।

एतद् वार्ता- उपसंहरणक्रमे सुविदितनामधेयस्य 'जीवकः' इत्यस्य आयुर्वेदस्नातकस्य उल्लेखोऽपि साध्यवस्तुपरकः सिद्धयति। गुरुदक्षिणादित्सुना जीवकेन समस्तेऽपि वने नैकोऽपि वृक्षादि इदृशः दृष्टः यः सांसारिकजीवानां कृते उपयोगी न स्यात्। अर्थात् प्रकृत्या यत्किमपि उद्भावितं एतत् सर्वं प्रयोजनपरमेव वर्तते।

इत्थम् अद्यतनेनानेन 'आयुर्वेदे वनस्पति-विज्ञानम्' इति रेडियोवार्तामाध्यमेन, विदुषां, नवोदित-उत्तराखण्डस्य उन्निनीषूणां शासकानां बुद्धौ वयमेतां वार्तां समानयामो यत् वनस्पति विज्ञानम् आयुर्वेदे प्रचुरतया वरीवर्ति। अस्माभिः पर्यावरणपरिष्काराय, जनकल्याणाय च आयुर्वेदशिक्षा पाठ्यविषयेषु निर्धारयितव्या। इति।

●

# कुलभूमि-गौरवम् (२)

-प्रो. सत्यदेवनिगमालङ्कारः
श्रद्धानन्द-वैदिक-शोधसंस्थानम्
गुरुकुल-काङ्गड़ी-विश्वविद्यालयः,
हरिद्वारम् ( उत्तराखण्डम् )

(१९)

उदयतीह रविस्त्वदनन्तरं,
निजसुतैस्सह जागरिता सदा ।
प्रथयसि त्वमहो बहु सौरभं,
तव तुला नहि काऽपि धरातले ॥

(२०)

सरसतामतुलां विपुलामिमां
प्रतनुषे शिवसौम्यसुधाञ्च त्वम्।
सुखरसेन समस्य हि पोषिणी
तव समा नहि काऽपि धरातले ॥

(२१)

प्रतिदिनं श्रुतिशास्त्रविबोधिका
सुरुचिरस्य पथश्च निदेशिका।
त्वमसि सामरवस्य सुलापिनी
तव तुला नहि काऽपि धरातले ॥

(२२)

शशिदिवाकरतारकमण्डलं
न कुरुते भुवि भासमहो तथा।
तव यथा भुवने कमनीयता
तव तुला नहि काऽपि धरातले ॥

(२३)

कमलकोमलमाननमस्ति ते
हृदयमप्यथ वत्सलताभरम्।
विमलसोमसमानि यशांसि ते
तव तुला नहि काऽपि धरातले ॥

(२४)

तव तनूर्नवतां धरते क्वचित्
क्वचिदथो भजतेऽपि पुराणताम्।
क्वचिदलं वहते रमणीयताम्
तव तुला नहि काऽपि धरातले ॥

(२५)

उदरमध्यगतास्तव ये जना
नियमितानथ तांस्तु व्रतीश्वरान्।
प्रणमति प्रकृतिर्नु भयात् स्वयं
तव तुला नहि काऽपि धरातले ॥

(२६)

मनसि यस्य तवाऽस्ति कृतं पदं
नयनयोस्त्व दर्शनलालसा।
भवति तस्य सुखं निजजीवने
तव तुला नहि काऽपि धरातले ॥

(२७)

सुरभि ते यशसा धवलं मुहु-
गुरुकुलं तव शिष्यजनैर्वृतम्।
सरसता वितता तव जीवने
तव तुला नहि काऽपि धरातले ॥

(२८)

श्रुतिगिरा हि सुधामधुवर्षिणी
विविधबोधफलैश्च विहर्षिणी।
प्रकृतवाग्व्यसनेन विलासिनी
तव तुला नहि काऽपि धरातले ॥

(२९)

प्रथयसीह शमं जगतीतले
स्वसरणौ सरसं शिववर्षिणी।
कलितभीषणकालविनाशिनी
तव तुला नहि काऽपि धरातले ॥

(३०)

सृजसि धाम निजं हि सुरालयं
प्रथयसि प्रथितं प्रभुपावितम्।
भवसि मानुषमानसमन्दिरे
तव तुला नहि काऽपि धरातले ॥

(३१)

उचितमेव चिनोषि गुरोः पदे
दयितमेव दयामयि देवते।
असि सुरेश्वरमानवरक्षिणी
तव तुला नहि काऽपि धरातले ॥

(३२)

द्रवसि दैत्यजने शरणागते
निपतिते निजपापजलार्णवे।
सुखदबोधदृशा परिरक्षसि
तव तुला नहि काऽपि धरातले ॥

(३३)

त्वमसुरान् विनिहंसि सुमानिनी
सुविदुषः किल रक्षसि भामिनी।
उचितचारिणि हे हितकारिणि
तव तुला नहि काऽपि धरातले ॥

(३४)

सरसताञ्च तनोषि जनान्प्रति
प्रतिदिनं सुदिनं तव चेष्टितम्।
भव भवाब्धिभयस्य निवारिणी
तव तुला नहि काऽपि धरातले ॥

(३५)

अतुलिता तुलना जगतीतले
ललितमस्ति ततं तव चाननम्।
सुललिता हि कलास्तव शोभना-
स्तव तुला नहि काऽपि धरातले ॥

(३६)

भवति शीतगुणः शरदागमे
हृदि तु तेऽस्ति सुशीतलता सदा।
जगति ते प्रकृतिः सुखवर्षिणी
तव तुला नहि काऽपि धरातले ॥

# ऋतु-वर्णनम्

-प्रो. रामदत्तशर्मा
प्लाटसंख्या १०२, प्रथमतलम्, पाकेट-१६, सैक्टर-२४, रोहिणी, दिल्ली

(१)

अत्युष्णवायुर्विचरेद्ध नित्यं,
ग्लानिप्रदोमोघकणै: सुयुक्त:।
जलानि प्राप्तुं ससखाश्चरन्ति,
तापेन तप्ता: पशवो निदाघे॥

(२)

शीतं जलं शीतलभोजनं वा,
दुग्धश्च शीतं दधिशीतलं वा।
वायुं च शीतं फलमेष शीतं,
वाञ्छन्ति ग्रीष्मेण सुतप्तलोका:॥

(३)

वर्षाकाले समायाते,
पतन्ति जलबिन्दव:।
कूजन्ति पक्षिणो यत्र,
स: काल: समुपस्थित:॥

(४)

नीलपीतवर्णा भूमि:,
शस्यसम्भारसम्भृता।
गुञ्जन्तो भ्रमरा यान्ति,
स: काल: समुपस्थित:॥

(५)

गर्भाधाने बलाकानां,
भविष्यन्ति य उत्सव:।
भ्रमन्ति जलदा यत्र
स: काल: समुपस्थित:॥

(६)

पतन्ति करका: मेघात्,
विद्युद् विद्योतते पुन:।
वहन्ति सरिता नित्यं
स: काल: समुपस्थित:॥

(७)

अमलनीरद्धूषितवापिका,
सुरभिणाऽब्जदलेन सुभासिता।
कमलनालसुवासितजीवनम्
पिबति जीवगणो विचरञ्जले॥

(८)

नवदलै: कुसुमै सुवासिता,
कमलनाल युतानि सरांसि च।
समदकोकिलगानसुभाषिता,
मधुरमाधव-काल-समागमे॥

(९)

विरोचते चोष्णजलं जनेभ्य:,
स्नानादिबुद्ध्यादिषु प्रातरेव।
तुषारपातेन लतावधूनाम्,
शीर्यन्ति शुष्काणि दलानि शीते॥

●

# प्रियायाः सान्निध्यम् (१)

-डॉ. प्रशस्यमित्रशास्त्री
(साहित्याकादमी-राष्ट्रपतिसम्मानितः)
बी-२९ आनन्दनगरम् (जेलरोड)
रायबरेली- २२९००१ ( उ. प्र. )

एकदा मध्याह्ने नभसि आषाढ-मासस्याऽभिनवान् मेघान् विलोक्य सान्ताक्रुज-निवासिनो देवदत्तस्य मानसं किञ्चिद् विचलितमिव सञ्जातम्। स विचारयितुमारब्धवान् यत् साम्प्रतं का खल्वेवंविधा वर्तते यत् सा तस्मै किमपि विशिष्टं प्रेमभावं प्रदातुं समर्था भवेत्। देवदत्तस्य मनसि कासाञ्चित् मुखमण्डलानि प्रकटीभूतानि याभिः समम् अध्ययनकाले स विभिन्नेषु चतुष्पथेषु भोजनालयेषु च पर्यटनं कृतवानासीत्। तेषु मुखमण्डलेषु कानिचित् मुखानि तदानीं तस्य चुम्बनविषयतामपि सम्प्राप्तानि।

परन्तु छात्रजीवनसमाप्तिसमकालमेव ताभिः समं तस्य सम्पर्कः प्रायः समाप्तः। तासु काश्चित्तु विवाहादिकं विधाय स्वकीये गार्हस्थ्यकर्मणि व्यापृताः सञ्जाताः परन्तु काचित् साम्प्रतमपि कुमार्य एव सत्यः कमपि राजकुमारमद्यावधि प्रतीक्षन्ते स्म। ताभिः समं यदा कदाचित् तस्य सम्मेलनमपि भवति स्म। ता अपि सम्मेलने सञ्जाते देवदत्तं यदा कदाचित् स्वकीयगृहेऽपि निमन्त्रयन्ति स्म। परन्तु सप्ताहपर्यन्तं स स्वकीयनियोजन-कार्ये तथाविधो व्यस्तो भवति यत् स क्वाचिद् गन्तुमपि न पारयते स्म। रविवासरेऽपि नैव, यतो हि तस्मिन् दिवसे पूर्णतया विश्राममधियाचते स्म।

अस्तु, अद्याऽपि रविवासरो वर्तते। स गृहे एव विष्टरासीनः सन् विश्रान्तिं कामयते स्म, परन्तु आषाढमासस्य नवोद्गता मेघास्तं व्याकुलीकुर्वन्ती स्म। महाकविः कालिदासः सत्यमेव निजगाद- 'मेघालोके भवति सुखिनोऽप्यन्यथावृत्तिचेतः।' देवदत्तोऽपि साम्प्रतं कस्याश्चिदपि साहचर्यं कामयते। सा सहचरी कुतः कथं वा प्राप्येत? इति विचारयन्नेव सा गृहान्निर्गत्य बहिरागतः। तदैव तस्य स्मृतिपथे श्वेतायाः संस्मृतिः समागताः। श्वेता तस्य सहपाठिनी बभूव। श्वेताया विवाहोऽपि साम्प्रतं नाऽभवत्। तस्याः गृहे पूर्वमपि बहुवारं गतोऽभवत्। अत एव अद्यापि स तस्या गृहे गन्तुं शक्नोति।

देवदत्तः सान्ताक्रुजोपनगरात् चेम्बूरोपनगरे गमनाय टैक्सीयानं कृतवान्। यतोहि श्वेता तत्रैव निवसति स्म। तत्र गत्वा सा तृतीयतले समारुह्य तद्गृहस्य द्वारघटिकां निपीडितवान्।

श्वेताया माता द्वारमुद्घाटितवती। सा मन्दं विहस्य देवदत्तं पृष्टवती-

‘कथय, कथम् आगतोऽसि ?’

‘श्वेता वर्तते ?’

‘अस्ति, आभ्यन्तरे समायाहि।’

गृहाभ्यन्तरे समागत्य देवदत्तः सुसज्जितकक्षस्य सोफासने समुपविष्टवान्। श्वेताया जननी पुनरब्रवीत्- ‘कथं वर्तसे ?’

‘साधुरेव सर्वे वृत्तान्ताः ? भवती कथं वर्तते ?’

‘सर्वं समीचीनमेव प्रचलति।’

श्वेताया माता पुनराभ्यन्तरे प्रविष्टवती। परन्तु श्वेता न समागतवती। किञ्चित्कालाऽनन्तरं तस्याः स्थाने तस्याः जनकः समागतः। जनकं विलोक्य समादरभावं प्रकटयितुं देवदत्तः स्वस्थानात् समुत्थाय संस्थितः। तद्विलोक्य श्वेताया जनको ब्रवीति- ‘अरे! समुपविश...’ देवदत्तः पुनः समुपविष्टवान्। तस्या जनकोऽपि तत्रैव सोफासने समुपविष्टवान्। समुपविश्य च स तं पृष्टवान्-

‘त्वं बहुकालाद् दृष्टिपथं नागतः। किं कारणं वर्तते ?’

देवदत्तः किञ्चिद् विहस्याऽब्रवीत्- ‘तथाविधं नियोजन-कार्यं वर्तते यत्समय एव नोपलभ्यते।’

‘कुत्र नियोजनवृत्तिं निर्वाहयसि ?’

‘एकस्मिन् व्यक्तिगत-कार्यालये।’

‘कस्मिन् प्रतिष्ठाने ?’

तेषां प्रश्नमाकर्ण्य देवदत्तस्तस्य प्रतिष्ठानस्य नामधेयं प्रोक्तवान्। तच्छ्रुत्वा श्वेताया जनकः पुनरब्रवीत्-

‘एतस्य प्रतिष्ठानस्य नामधेयं तु पूर्वं कदाचित् न श्रुतवान्।’

‘नवीनमेव साम्प्रतं समुद्घाटितं तु पूर्वं कदाचित् न श्रुतवान्।’

‘तत्र तु मन्ये कठिनः परिश्रमः करिष्यते स्म ?’

‘एवं किल।’

‘कियद् वेतनं वर्तते ?’

‘साधारणमेव वर्तते।’

‘पुनरपि कियद् वर्तते ?’

‘पञ्चविंशति-सहस्ररुप्यकाणि’

श्वेतायाः पितुर्मुखमण्डलं तत्सर्वमधिगम्य किञ्चिद् गभीरमिव सञ्जातम्। पुनः पृष्टवान्- ‘त्वं कुत्र निवससि ?’

‘सान्ताक्रुज स्ट्रीट-भवने।’

‘स्वकीयं गृहं वर्तते ?’

तत्सर्वं प्रश्नसमूहं श्रुत्वा देवदत्तः क्षुब्ध इव सञ्जातः। तथाविधाः प्रश्नास्तस्मै कथमपि न रोचन्ते स्म। यदि स इदमज्ञास्यत् यदत्र समागत्य तथाविधप्रश्नानां साम्मुख्यं भविष्यति, तर्हि स तत्र नैवाऽऽगमिष्यत् अपितु कुत्रचिदन्यत्राऽगमिष्यत्। स त्वत्र श्वेतां सम्मेलितुं समागत आसीत् न खलु तस्याः पितरं सम्मेलितुम्। आषाढस्य नवागतं मेघमण्डलं तस्य चित्ते विकारभावं समुत्पादितवत्। श्वेता तस्य विकारभावमपनेष्यति इति विचार्यैवाऽत्र स समागतो बभूव। परन्तु श्वेता कुत्र वर्तते ? कथं न सा निःसरति ?

गृहे किं कुरुते? कियत्पर्यन्तं तस्याः पितुः प्रश्नानामाक्रमणं तेन षोढव्यम् भविष्यति? इति सर्वं मनसि विचारयन् स तत्र तिष्ठति स्म। स्वकीयप्रश्नस्य चोत्तरमनुपलभ्य तस्या जनकस्तं द्वितीयवारं प्राह- 'किं यत्र वससि तत्ते स्वकीयं गृहं वर्तते?'

देवदत्तः शान्तम्प्रत्युवाच- 'न हि।' तदनन्तरं सोऽग्रे पृष्टवान्- 'श्वेता किं कुरुते?'

'सा सम्भवतः........' इति कथयन्नेव तस्याः पिता ततः समुत्थाय शनैः-शनैः प्रचलन् गृहाभ्यन्तरे प्रविष्टवान्।

किञ्चित्कालाऽनन्तरमेव श्वेता तस्य पुरतः समागत्य स्थितवती न तूपविष्टवती। तस्या मुखमण्डले प्रसन्नताया भावा नाऽभवन्। सा पृष्टवती 'कथय, कथं समागतोऽसि?'

देवदत्तः सोफासनात् समुत्थाय स्पष्टतयाऽब्रवीत्- 'अहमद्य तव साहचर्यम् अभिलषामि।'

'किमर्थम्?'

'मया सह गृहाद् बहिर्निर्गमिष्यसि?'

'कुत्र?'

'चलचित्र-दर्शनाय।'

'मम शिरसि पीडा वर्तते।'

'एकाम् औषधगोलिकां गृहाण सर्वं साधु भविष्यति।'

'गोलिका खादिता मया।'

'यदि त्वमद्य न चलिष्यसि तर्हि मरिष्यामि।'

'तर्हि म्रियस्व।'

'किमयम् अन्तिमो निर्णयस्तव?'

'एवम्।'

देवदत्तो ज्ञातवान् यत् श्वेतायाः शिरसि पीडा न वर्तते। सा असत्यं भणति। वस्तुतः सा देवदत्तेन सह भ्रमणार्थं गन्तुं न कामयते स्म। सा सम्भवतः स्वजनकेन ज्ञातवती यत् देवदत्तः कस्मिंश्चित् साधारणे कार्यालये कार्यरतो वर्तते। सान्ताक्रुज-स्ट्रीटे कस्मिंश्चिद् भाटकप्राप्ये गृहे निवसति। अत एव तथाविधेन पुरुषेण को लाभः?

देवदत्तस्तत्सर्वं निरीक्ष्य सोफासनाद् उत्तिष्ठन् शान्तस्वरेणाऽब्रवीत्- 'अस्तु द्वारमुद्धाटय।'

श्वेता द्वारमुद्धाटितवती। देवदत्तः सोपानमवरुह्य राजपथे समायातः। परन्तु तस्य मनसि वपुषि च यो वह्निः प्रज्ज्वलितः स नितरां ज्वलावलीढः संवृत्तः। अद्यपर्यन्तं कापि कामिनी तस्य तथाविधमपमानं न कृतवती। स राजपथ एव विद्यमानात् ताम्बूलापणात् ताम्बूलद्वयं क्रीत्वा मुखे तस्य गाढं सक्षोभं चर्वणं कुर्वाणः स्वकीयं कोपं शमयमान आत्मानं शान्तं कर्तुं प्रयतितवान्।

आषाढस्याऽभिनवा वारिवाहा आकाशमाच्छादयन्तो वर्धमाना भवन्ति स्म। देवदत्तो गगनं निपुणतया निरीक्षितवान्। स इदं ज्ञातुं नितरामसमर्थ आसीत् यदधुना स किं कुर्यात्? कुत्र गच्छेत्? कस्याः

पार्श्वे गच्छेत् यद्यपि स क्वचिदपि गन्तुं शक्नोति स्म। तद्यथा रचनाया पार्श्वे, वन्दनायाः सकाशं, लताया गृहे वा। परन्तु श्वेतायाः सकाशं तथाविधमपमानं समधिगम्य स कुत्रचिदपि शान्तिं नैव लप्स्यते। तत्कृतस्तिरस्कारभावस्तु सदैव तस्य मनसि सततं स्थास्यत्येव। एनं तिरस्कारभावं मनसि निधाय स कस्या अपि गृहे गत्वाऽपि, कस्याश्चिदपि वा साहचर्यमधिगम्याऽपि मानसे शान्तिभावं न शक्नोति प्राप्तुम्।

अत एव स तत्सर्वं हृदि निपुणं विचिन्त्य पुनरपि श्वेताया गृहे एव गन्तुं निश्चयं कृतवान्। विश्वविद्यालयेऽध्ययनकाले स एनां श्वेतामेव नीत्वा कदाचिद् राजमार्गेषु इतस्ततः पर्यटनं कुरुते स्म, कदाचित् चलचित्रालयेषु गच्छति स्म, कदाचित् क्वचित् चायगृहेषु काफीपानं कुर्वाणः समयं यापयति स्म कदाचिच्च रहसि प्राप्तावसरः सन् चुम्बनमपि विदधाति स्म। कदाचिदपि महिलामित्रैः समं पराजयभावबोधं देवदत्तो न धारयति स्म। ततः कथमद्य स स्वपराजयं स्वीकुर्यात्? नैतत् कथमपि भवितुं शक्नोति। एनं पराजयं विजयस्वरूपे परिवर्तितुं किमपि करणीयमेव। निश्चितमेव तेन काचित् नवीना भूमिका सम्भावनीया। तत्सर्वं विचार्य स पुनः श्वेतायाः गृहस्य बाह्यद्वारं प्राप्तवान्।

स द्वारस्य विद्युद्घटिकां शनैर्निपीडितवान्। श्वेताया जननी एव पुनः द्वारमुद्घाट्य बहिरागतवती। तस्या मुखमण्डले इदानीं पूर्ववत् सुस्मितिर्नासीत् प्रत्युत क्षोभभावः परिलक्ष्यते स्म। सा पृष्टवती- 'अधुना पुनः किम्?'

देवदत्तः किञ्चिद् हसितवान्। विहसन्नेव च स एवमब्रवीत्- 'पितृव्ये ! मया किमपि स्खलितम्।'

'तत् किम्?'

'भवद्गृहान्निर्गत्य राजमार्गे समायात एव मम स्मृत्यां समागतो यदहमत्र कथं समायातः। तस्य तु कथनमेव मया विस्मृतम्।'

'किं भो! तत्।'

'अहं भवतो निमन्त्रयितुं समागतोऽभूवम्।'

'निमन्त्रणम्? किमर्थं तत्?'

'गृह-प्रवेशस्य।'

तदाकर्ण्य श्वेताया माता विस्मयान्विता सती प्रोक्तवती- 'कुत्र तत्?'

'माडल-टाउन-पार्कस्य निकटे।'

'अहो ! एष तु मनोरमो वृत्तान्तः। आभ्यन्तरे समायाहि, आगत्य तिष्ठ। अहं त्वदीयं पितृव्यमपि समाह्वयामि।'

तदनन्तरं देवदत्तस्तत्रैव सोफासने समुपविष्टः। श्वेताया माता तत्र स्थितैव स्वपतिं सम्बोधयन्ती सोच्चैः प्रोक्तवती- 'अयि! शृणोषि? अत्र तु आयाहि....।'

(क्रमशः)

# स्वामी दर्शनानन्दः सरस्वती

–प्रो. डॉ. निगमशर्मा
संस्कृतविभागाध्यक्षचरः
गुरुकुल काङ्गड़ीविश्वविद्यालयः, हरिद्वारम्

ऋषेर्दयानन्दादनन्तरं सूक्तिपूतात्मानौ द्वौ महात्मानौ वेदवाङ्मये विशिष्टौ तर्कशिरोमणि रमणीयवाग्विन्यासौ मधुरौ कुशलौ देवभिषजाविव आर्य-समाजे प्राणप्रियौ प्राणभूतावास्ताम्। एकः स्वामी श्रद्धानन्द इतरः स्वामी दर्शनानन्दः। स्वामिनो दर्शनानन्दस्य जन्म माघकृष्ण दशम्यां १९१८ विक्रमाब्दे जातम्। मातुर्नाम हीरादेवी पितुश्च पण्डित रामप्रतापः। मौद्गल्यगोत्रीयः सारस्वतोऽयं पूर्वकृपारामनाम्नाऽनन्तरं च दर्शनानन्दनाम्ना ख्यातिं लब्धवान्। एवमनुश्रूयतेऽतोऽपि प्रागस्य नाम 'नेतराम' इत्यासीत्। एकादशे वर्षे एवास्य पार्वती नाम्न्या कन्यकया सह श्रावण कृष्णा पञ्चमी १९२९ वैक्रमाब्दे वर्षे विवाहः समजनि। परं कृपारामस्तु पठनेऽभ्यासे तर्के दर्शने व्याकरणे च निरन्तरं चेष्टते स्म। पारसीभाषायां संस्कृते चापि वैदुष्यं नदीष्णतां च जगाम। अस्य पिता सदोत्साही विद्यावगाही जगति विनम्र आत्मनि लग्नः परम-सुखे मग्नश्च, व्यवसाये दक्षोऽपि स्वच्छान्तःकरणः, सदेहोऽपि विदेह इव रक्तोऽपि विरक्त इवासीत्। एवंविधः स जनो यस्य संसार-सरोवरे शतदलमिवास्य हृदयपुण्डरीकम्। एवंविधं पुण्यं प्रसन्नं प्रसादलब्धं पितरमासाद्य कृपारामस्य मनो नितरां मोदते। बालक्रीडास्वपि न चापलमाचरति। वृद्धेष्वपि कुशलभाषितामङ्गी करोति। दीनेषु दक्षेषु पक्षेषु विपक्षेष्वपि सर्वत्र सर्वतन्त्रस्वतन्त्रः।

एवंविधं कुमारं पुत्रं प्राप्य महनीयकीर्तेः पितुरानन्दः सीमानमत्यक्रामत्। विविधविद्या-विलास-प्रचुरे पुत्रे को नानन्दमुल्लासयति। कुमारः कृपारामोऽपि स्वच्छोऽपि स्वच्छन्दोऽपि नोच्छृङ्खलतां प्रपेदेऽपितु दिने-दिने पठने-पाठने चिन्तने मार्दवे च प्रौढ़िमटीकत।

तस्मिन् रमणीये यौवने स्वातन्त्र्योल्लासन-प्रखरी क्रियमाणे गुणैश्च संस्क्रियमाणेऽस्माकं पवित्रे भारते देशे जनतायां महान् ऊत्साहः संग्रामेऽपूर्वता प्रचण्डो रणताण्डवः साहसधनानामुज्जृम्भते स्म। कृपारामे तु राष्ट्रभक्ती रमणीयाऽसीदथापि प्रभुभक्तिरपि नितरां सुखमुत्पादयति स्म। अत आत्मना नियन्त्रितः, वाचा उत्साहितः, मनसा प्रकृष्टतया प्रगुणीकृतोऽयं महानुभावः स्वतन्त्रता-युद्धे विशदो भवन्नपि संस्कृते संस्कृतौ महाननुरागवान् सम्पन्नः।

काश्यां गतश्च लुधियाना-नगरात् जगरांवा जन्मभूमिप्रेम चेतसि दीप्तम्। दृष्टा विदुष्मती नगरी। अनुभूतो विदुषां तीर्थरसः अभिरामे कृपारामे प्रसृता वाग्वल्लरी। अध्ययनाकाङ्क्षा दीक्षया सह ततान। नयने हृदये च विशालता, जङ्घायां वक्षसि च विस्तीर्णता, बुद्धौ, दृष्टौ च तीक्ष्णता, आकृतौ मुखे च सौम्यता, भाले कपोले च कान्तिः, करे कर्णे च शुश्रूषा, पदे शास्त्रे च गतिः, वपुषि मनसि च दीप्तिः, गुरौ गिरि च गतिः, प्राणिष्वात्मनि चाभयता यस्य श्रुतिशिरोधरस्य विततं सततमासीत्।

अल्पीयस्येव काले ज्ञाततत्त्व इवाधिगत-निहितार्थ इव तस्मिन् विद्याऽवदातमाततान। स्वामिनो मनीषानन्दात् मीमांसां वेदान्तं चाभिनिपीय एका संस्कृतपाठशालाऽपि तत्र काश्यां येन शरणेप्सवः पठने सोत्सुको जायेरन्, जायेरश्चास्यां वाग्लतायां मनोहराणि पुष्पाणि। वर्धेरश्च पिपासवः संस्कृतासवः सदोन्नतिं च यियासवः। ख्यातनामाऽऽचार्यः काशीनाथस्तदा तत्राध्यापयति स्म। आचार्य-गङ्गादत्तः पण्डित-भीमसेन-प्रमुखा अस्य मनीषिणः शिष्याः। येषां ख्यातिरधुनापि मधुबिन्दुसदृशैरक्षरैः सूक्ति-सम्भृतात्मानो महीयसोत्साहेनालिखन्ति येषां कीर्तिपल्लवानधुनाऽपि कैलास-नन्दी नन्दने च कामधेनुश्चरन्ती प्रमोदं भजेते। पण्डितभीमसेनस्य सुपुत्रः पण्डितहरिदत्तशास्त्री, यं परीक्षापिशाच इव श्लाघन्ते, यस्य वाङ् मधुरा काव्यप्रणयिनी च, वेषः सरलः पावनश्च, भाषा सकला प्राञ्जला च, नीतिर्मृद्वी ऋज्वी च। यश्छात्रोद्धारकर्णधारः, प्रियः प्रियवाक् च।

इत्थं भूतः स कृपारामः। कल्पवृक्षः सः। यस्य मणिमयमञ्जरीस्थाने गुरवश्चिन्तन-चिन्तामणि-प्रकर्षः कोऽपि तस्य। वीक्ष्य संसारस्यासारतां तत्त्वं प्रत्युन्मुखः स निर्वेदमापन्नः तामात्मनोऽनुभवन् १९४३ विक्रमाब्दे स्वामिनोऽनुभवानन्दात् संन्यासदीक्षां जग्राह। ततोऽस्य नाम '**दर्शनानन्द**' इति जातम्। स वशी मृदुश्च, शान्तो दान्तश्च श्रेयसे ततो ब्रह्मणि रतश्च सर्वतन्त्रस्वतन्त्रः।

आर्यसमाजाधिकारिभिर्निर्मिते निष्फले तर्कहीने तुच्छे नियमजाले न कदाप्यात्मानं बबन्ध। अतः प्रतिनिधिरूपा सभा सदैवेनं नेत्र-कण्टकं मनुते स्म। उत्तर-प्रदेशेऽस्येदृशी दशा महानुभावस्य। परं ततोऽपि स्वमहिम्नैव विद्यया तर्केण ज्ञानेन तथा विधेन चानुभावेनायं प्रशस्तिमगात्। तदानींतना इदानीं तनाश्चापि मुक्तकण्ठकण्ठीरवघोषेण तमभिनन्दन्ति न वैरायन्ते, अभिलषन्ति कामधेनुमिवास्य वाचं चर्चापथमतारयन्ति च। यदाऽयं संन्यासी भ्रमणमातनोत्, तदा स्थाने-स्थानेऽस्य व्याख्यानानि शास्त्रार्थाश्च व्यभवन्। भ्रान्तीरपसारयामास, ऋषेर्दयानन्दस्येष्टं व्याख्यातवान्। तस्य भाष्यं मधुरया ध्यातवान्, वृक्षे जीवोऽस्ति नवेति, अस्मिन् विषये महानस्य शास्त्रार्थः पण्डित-गणपतिशर्मणा सह समजनि। ये तं शास्त्रार्थं प्रति प्रामाणिकास्ते कथयन्तीत्थं नेदृशः शास्त्रार्थोऽस्माभिः कदापि दृष्टः श्रुतो वा। आचार्यपद्मसिंहशर्माऽस्य समग्रस्य शास्त्रकथा व्यापारस्य लेखकः। तत्कृपयैवाद्यावधि-शास्त्रार्थविषयोऽयं सुधियां सविधे वर्तते।

स्वामी दर्शनानन्दः खलु वृक्षे जीवं न मनुते। गुरुकुल पोठोहार (रावलपिण्डी) स्थानस्याचार्यः पण्डितमुक्तिरामोपाध्यायोऽपि न स्वीकरोति जीवं वृक्षे। अयमेव पण्डितोऽग्रे गत्वा स्वामिन आत्मानन्दस्याख्यया ख्यातिमभजत। पण्डित-गणपतिशर्मा खल्वपि सम्भूतः पण्डित-समाजे। तस्य स्मृतिं तर्कं प्रामाण्यं स्फूर्तिं चेतनामद्यावधि श्लाघन्ते जनाः।

तदानीं महामहोपाध्यायः शिवकुमारशास्त्री काश्यां टीकते स्म। तेन सह महान् शास्त्रार्थोऽस्य स्वामिनो देवविषये जातः, शास्त्रिणः पक्षस्तु '**देव**' शब्दस्यालौकिकशक्तिसम्पन्ना देवतैवासीत्। परं संन्यासिनो मतमिदं यद् देवशब्दः विदुषि वर्तते। बहुभिः प्रमाणैस्तर्कैश्चायं महानुभावः स्वविषयं प्रतिपादितवान्। अन्ते विजयश्रिया स्वामी सत्कृतः। आगरा-नगरे मौलवी अब्दुल हमीद नाम्ना अरबीभाषा-पण्डितेन सहास्य शास्त्रार्थः समजनि। तस्य विदुषो मदमिदं यत् 'कुर-

आन' ग्रन्थ एव ज्ञान-विज्ञानविषये प्रमाणभूतः। सोऽपि स्वामिना पराजयं प्राप्य वेदस्योत्कृष्टतामीश्वरविषयताम् अपौरुषेयतां च स्वीकृतवान्।

अनेनैव प्रकारेण इटावा-नगरे पण्डित-भीसेनेन सह, ईसाई-पादरी-ज्वालासिंहेन सह, बिजनौरनगरे एकेन राजपुरुषेण सह, मुरादाबाद-नगरे पण्डितज्वालाप्रसादेन सह, जैनपण्डितगोपालेन च सह भूयांसः शास्त्रार्थाः जाताः। सर्वत्रैवास्माकं श्रुतिमार्गगामी स्वामी विजयपताकां लहर्युपेताञ्चकार।

स्वामिनो दर्शनानन्दस्य हृदयमतीव कोमलं भव्य-भावनावासितं च। स्वतन्त्रता संग्रामविषयं पुरस्कृत्य उर्दूभाषायां भूयांसि छन्दांसि विविध रूपाणि हिन्दीभाषायां च तेन रचितानि, यानि तदाऽतीव प्रभावोत्पादकानि कवित्वप्रतिभाजुष्टान्यासन्। स एकः सफलः कथाकारोऽपि। तस्योपन्यासा अपि धर्मवीर सत्यव्रती महानन्द-क्षमाचन्द्रोदय-कथा पञ्चविंशतिका, चण्डाल-चौकड़ी विचित्रो ब्रह्मचारी इत्यादयः सन्ति।

हिन्दीभाषां प्रति तस्य महती ममता। भूयसां समाचारपत्राणामसौ सम्पादक आसीत्। अनेकानि पत्राणि त्वतीव महत्त्वं भजन्ते। तद्यथा- 'तिमिरनाशकं' काशीतः,'वैदिकधर्मः' मुरादाबादनगरात् 'वैदिक मैंगजीन' देहलीतः, 'तालिबे-इल्म' आगरानगरात्, 'गुरुकुलसमाचारः' सिकन्दराबाद-नगरात्, 'आर्यसिद्धान्तः' बदायूँ नगरात्, 'मुबाहिसा' बदायूँ नगरात्, 'ऋषिदयानन्दः' लवपुरात्, 'वैदिक-फिलासफी' रावलपिण्डी नगरात्, इत्यादीनि रचना चातुरीजूंषि माधुरीपूर्णानि पत्राण्यासन्।

लघूनि-लघूनि पुस्तिका-रूपाणि स्वमतपत्राणि प्रकाशनेऽतीव विपुलवक्षो दक्षोऽसौ। पण्डित-नरदेवशास्त्री भणति स्म न्यूनान्यूनं पञ्चादशादधिक-शतद्वयं संख्या तेषां भविष्यति। दर्शनानन्द-ग्रन्थसंग्रहनाम्ना केषाञ्चित् संग्रहः प्रकाशितोऽपि। गुरुकुलज्वालापुरादपि भागद्वयं कृत्वा प्रकाशितः संग्रहोऽस्य देहलीपत्तनात्, आगरानगरात् मथुरा-स्थानादपि तस्य संग्रहाः प्रकाशतामानीताः। भूयांसि तु पुस्तिकारूपाणि उर्दूभाषायां प्रकाशितानि। हिन्दीभाषायामपि मुद्रणानि जातानि सन्ति। न्याय-वेदान्त-प्रभृतिष्वपि दर्शनेषु तस्य भाष्यं विद्वद्भिराद्रियते। उपनिषत्सु मनुस्मृतौ गीतायामपि तस्य टीका प्रशंसां गाहते।

इस्लामधर्म-समीक्षा, जैनमतसमीक्षा, पुनर्जन्म, धर्मशिक्षा, आत्म-भिषक्, पापं पुण्यं च, स्वराज्यं शान्तिश्च, कर्मव्यवस्था, अकालमृत्युमीमांसा, श्राद्धव्यवस्था, गुरुकुलम्, ईश्वरविचारः, मूर्खता, उत्थातव्यम्, कथं निर्बला भवितव्यम्?, आर्यधर्मसभा, अपि संस्कृतं मृतभाषा? भारतदुर्भाग्यम्, निःशुल्कशिक्षा, आत्मिकबलम्, इत्यादीनि तस्य निबन्धजातान्यद्यापि ज्ञानविलसितानि बुद्धेः रसायनानि जीवनोत्पादनानि च।

स्वामी दर्शनानन्दः स्फूर्तिमान् कर्मठः प्रशासनाश्रयोऽनुशासनप्रियश्चासीत्। गुरुकुल-स्थापने संचालने च महती शक्तिरस्योर्वरा। महती साधनसम्पन्नताऽप्यस्यासीत्। पुस्तिकालाभेन दानेन पुस्तक-व्यवसायेन च धनस्रोतः सदैवः तस्य

निरवरोधं सानुरोधं च। अतः एव सिकन्दराबाद नगरे, विरालसीग्रामे(मुजफ्फरनगरे), ज्वालापुरे, बदायूँ नगरे, रावलपिण्डी(गुरुकुल पोठोहार) स्थाने च तस्य शोभनानि प्रशंसितानि सद्गुणोपेतानि सगौरवाणि छात्रगुरुवृद्धसिद्धोन्मुखानि गुरुकुलानि ससाधुवादं कार्यपराण्यासन्।

एवंविधो महान् पराक्रमशाली विमल-विपुलबुद्धिः सहृदयः समाजसेवी स्वामी दर्शनानन्दः। संस्कृतपुस्तक-प्रकाशने छात्राणां कृते पुस्तकप्रदाने च निरतिशय उदारः। भोजनाच्छादन-प्रबन्धे गद्यबन्धे भाषणे त्यागे स्वच्छतायां तर्के तस्य नाम जनाः स्मरन्ति। एकदा तु यदा स हाथरसनगरं स्वनिवासनेनालङ्करोति, सहसैवैकदा कर्मकरमाहूय आर्यसमाजं गोमयेन भूमिलेपम् अकारयत्। नगरे च सडिमडिमनादं घोषणां च कारितवान्, यदि कोऽपि वैदिकधर्मे सन्देहं कुरुते, तर्हि स आगत्य मया सह शास्त्रचर्चां करोतु। इतो दिवङ्गते च मयि न कोऽपि शङ्कां तनुयाद् यत् स्थिते स्थिते स्वामिनि दर्शनानन्दे नाहममुं प्रश्नं पृष्टवानिति। भूयसां जनानां तत्र श्रेणिश उपस्थितिर्जाता। किमिदं कुत इदं कस्मादिदं कीदृशमिदमिति वदत्सु जनेषु रुदत्सु भक्तेषु विलपत्सु प्रियेषु विधिं प्रति धिक्कारपरेषु सभ्येषु स सैव स्वामी स्वस्थानादुत्थाय लिप्तायां भूमौ परं शिवं जपन् विकिरन्निवानन्दं मूर्तिमानिव हर्षप्रकर्षः स्वदेहं जहौ।

वृद्धा अद्यावधि तत्कथां कुर्वते। बालाः पुनः पुनस्तस्य चर्चामाकर्णयन्ति। एवं विधः स स्वामी यत्र गच्छति तत एवोपकरणानि समासादयति, यादृशं यत्र पश्यति, तत्र तादृशमिव कर्म कुर्वाणो वैदिकधर्मस्य प्रचारं करोति। निस्पृह इव त्यागपर इव सर्वं पर इव सर्वेषु विलीनः। धन्या वयं यदधुनापि तस्य चर्यां कुर्वन्तो जिह्वा चापलं सफलयामः।

हरिद्वार-स्थितस्य ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य मुखपत्रम्
भारतोदयः (संस्कृत-मासिकम्)
P.O. गुरुकुलकाङ्गड़ी २४९४०४
हरिद्वारम् (उत्तराखण्डम्)
सेवायाम्,
श्री.......................................

मुद्रकेण,प्रकाशकेनडॉ. हरिगोपालशास्त्रिणा ज्वालापुर-स्थिते'न्यू जे.एन. स्टेशनरी मार्ट' नामकेमुद्रणालये मुद्रापयित्वा'भारतोदयः' मासिकपत्रंप्राकाश्यंनीतंहरिद्वार-स्थितयाज्वालापुरीय-गुरुकुलमहाविद्यालय-सभया।
सम्पादकः डॉ. हरिगोपालशास्त्री